# Shri Kukke Subrahmanya Bhujanga Stotram

# શ્રીકુક્કેસુબ્રહ્મણ્યભુજઙ્ગસ્તોત્રમ્

## Document Information

Text title : shrii Kukke subrahmaNyabhujaNgaprayaatastotraM 3

File name : subrabhujanga3.itx

Category : subrahmanya, bhujanga

Location : doc_subrahmanya

Proofread by : PSA Easwaran

Description-comments : Subrahmanyastutimanjari, Mahaperiaval Trust

Acknowledge-Permission: Mahaperiaval Trust

Latest update : December 18, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 11, 2024

*sanskritdocuments.org*

# શ્રીકુક્કેસુબ્રહ્મણ્યભુજઙ્ગસ્તોત્રમ્

ગણેશં નમસ્કૃત્ય ગૌરીકુમારં
    ગજાસ્યં ગુહસ્યાગ્રજાતં ગભીરમ્ ।
પ્રલમ્બોદરં શૂર્પકર્ણં ત્રિણેત્રં
    પ્રવક્ષ્યે ભુજઙ્ગપ્રયાતં ગુહસ્ય ॥ ૧॥

પૃથક્ષટ્કિરીટસ્ફુરદ્દિવ્યરત્ન-
    પ્રભાક્ષિપ્તમાર્તાણ્ડકોટિપ્રકાશમ્ ।
ચલત્કુણ્ડલોદ્યત્સુગણ્ડસ્થલાન્તં
    મહાનર્ઘહારોજ્જ્વલત્કમ્બુકણ્ઠમ્ ॥ ૨॥

શરત્પૂર્ણચન્દ્રપ્રભાચારુવક્ત્રં
    વિરાજલ્લલાટં કૃપાપૂર્ણનેત્રમ્ ।
લસદ્ભ્રૂસુનાસાપુટં વિદ્રુમોષ્ઠં
    સુદન્તાવલિં સુસ્મિતં પ્રેમપૂર્ણમ્ ॥ ૩॥

દ્વિષડ્બાહુદણ્ડાગ્રદેદીપ્યમાનં
    ક્વણત્કઙ્કણાલઙ્કૃતોદારહસ્તમ્ ।
લસન્મુદ્રિકારત્નરાજત્કરાગ્રં
    ક્વણત્કિઙ્કિણીરમ્યકાઞ્ચીકલાપમ્ ॥ ૪॥

વિશાલોદરં વિસ્ફુરત્પૂર્ણકુક્ષિં
    કટૌ સ્વર્ણસૂત્રં તટિદ્વર્ણગાત્રમ્ ।
સુલાવણ્યનાભીસરસ્તીરરાજત્-
    સુશૈવાલરોમાવલીરોચમાનમ્ ॥ ૫॥

સુકલ્લોલવીચીવલીરોચમાનં
    લસન્મધ્યસુસ્નિગ્ધવાસો વસાનમ્ ।
સ્ફુરચ્ચારુદિવ્યોરુજઙ્ઘાસુગુલ્ફં
    વિકસ્વત્પદાબ્જં નખેન્દુપ્રભાઢ્યમ્ ॥ ૬॥

દ્વિષટ્પઙ્કજાક્ષં મહાશક્તિયુક્તં
    ત્રિલોકપ્રશસ્તં સુશિક્કે પુરસ્થમ્ ।
પ્રપન્નાર્તિનાશં પ્રસન્નં ફણીશં
    પરબ્રહ્મરૂપં પ્રકાશં પરેશમ્ ॥ ૭॥

કુમારં વરેણ્યં શરણ્યં સુપુણ્યં
    સુલાવણ્યપણ્યં સુરેશાનુવર્ણ્યમ્ ।
લસત્પૂર્ણકારુણ્યલક્ષ્મીશગણ્યં
    સુકારુણ્યમાર્યાગ્રગણ્યં નમામિ ॥ ૮॥

સ્ફુરદ્રત્નપીઠોપરિ ભ્રાજમાનં
    હૃદમ્ભોજમધ્યે મહાસન્નિધાનમ્ ।
સમાવૃત્તજાનુપ્રભાશોભમાનં
    સુરૈઃ સેવ્યમાનં ભજે બર્હિયાનમ્ ॥ ૯॥

જ્વલચ્ચારુચામીકરાદર્શપૂર્ણં
    ચલચ્ચામરચ્છત્રચિત્રધ્વજાઢ્યમ્ ।
સુવર્ણામલાન્દોલિકામધ્યસંસ્થં
    મહાહીન્દ્રરૂપં ભજે સુપ્રતાપમ્ ॥ ૧૦॥

ધનુર્બાણચક્રાભયં વજ્રખેટં
    ત્રિશૂલાસિપાશાઙ્કુશાભીતિશઙ્ખમ્ ।
જ્વલત્કુક્કુટં પ્રોલ્લસદ્દ્વાદશાક્ષં
    પ્રશસ્તાયુધં ષણ્મુખં તં ભજેઽહમ્ ॥ ૧૧॥

સ્ફુરચ્ચારુગણ્ડં દ્વિષડ્બાહુદણ્ડં
    શ્રિતામર્ત્યષણ્ડં સુસમ્પત્કરણ્ડમ્ ।
દ્વિષદ્વંશખણ્ડં સદા દાનશૌણ્ડં
    ભવપ્રેમપિણ્ડં ભજે સુપ્રચણ્ડમ્ ॥ ૧૨॥

સદા દીનપક્ષં સુરદ્વિડ્વિપક્ષં
    સુમૃષ્ટાન્નભક્ષ્યપ્રદાનૈકદક્ષમ્ ।
શ્રિતામર્ત્યવૃક્ષં મહાદૈત્યશિક્ષં
    બહુક્ષીણપક્ષં ભજે દ્વાદશાક્ષમ્ ॥ ૧૩॥

ત્રિમૂર્તિસ્વરૂપં ત્રયીસત્કલાપં

    ત્રિલોકાધિનાથં ત્રિણેત્રાત્મજાતમ્ ।
ત્રિશક્ત્યા પ્રયુક્તં સુપુણ્યપ્રશસ્તં
    ત્રિકાલજ્ઞમિષ્ટાર્થદં તં ભજેઽહમ્ ॥ ૧૪॥

વિરાજદ્ભુજઙ્ગં વિશાલોત્તમાઙ્ગં
    વિશુદ્ધાત્મસઙ્ગં વિવૃદ્ધપ્રસઙ્ગમ્ ।
વિચિન્ત્યં શુભાઙ્ગં વિકૃત્તાસુરાઙ્ગં
    ભવવ્યાધિભઙ્ગં ભજે કુક્કલિઙ્ગમ્ ॥ ૧૫॥

ગુહ સ્કન્દ ગાઙ્ગેય ગૌરીસુતેશ-
    પ્રિય ક્રૌઞ્ચભિત્તારકારે સુરેશ ।
મયૂરાસનાશેષદોષપ્રણાશ
    પ્રસીદ પ્રસીદ પ્રભો ચિત્પ્રકાશ ॥ ૧૬॥

લપન્ દેવસેનેશ ભૂતેશ શેષ-
    સ્વરૂપાગ્નિભૂઃ કાર્તિકેયાન્નદાતઃ ।
યદેત્થં સ્મરિષ્યામિ ભક્ત્યા ભવન્તં
    તદા મે ષડાસ્ય પ્રસીદ પ્રસીદ ॥ ૧૭॥

ભુજે શૌર્યધૈર્યં કરે દાનધર્મઃ
    કટાક્ષેઽતિશાન્તિઃ ષડાસ્યેષુ હાસ્યમ્ ।
હૃદબ્જે દયા યસ્ય તં દેવમન્યં
    કુમારાન્ન જાને ન જાને ન જાને ॥ ૧૮॥

મહીનિર્જરેશાન્મહાનૃત્યતોષાત્
    વિહઙ્ગાધિરૂઢાદ્બિલાન્તર્વિગૂઢાત્ ।
મહેશાત્મજાતાન્મહાભોગિનાથાત્
    ગુહાદ્દૈવમન્યન્ન મન્યે ન મન્યે ॥ ૧૯॥

સુરોત્તુઙ્ગશ‌ૃઙ્ગારસઙ્ગીતપૂર્ણ-
    પ્રસઙ્ગપ્રિયાસઙ્ગસમ્મોહનાઙ્ગ ।
ભુજઙ્ગેશ ભૂતેશ ભૃઙ્ગેશ તુભ્યં
    નમઃ કુક્કલિઙ્ગાય તસ્મૈ નમસ્તે ॥ ૨૦॥

નમઃ કાલકણ્ઠપ્રરૂઢાય તસ્મૈ
    નમો નીકલણ્ઠાધિરૂઢાય તસ્મૈ ।
નમઃ પ્રોલ્લસચ્ચારુચૂડાય તસ્મૈ

નમો દિવ્યરૂપાય શાન્તાય તસ્મૈ ॥ ૨૧॥

નમસ્તે નમઃ પાર્વતીનન્દનાય
સ્ફુરચ્ચિત્રબર્હીકૃતસ્યન્દનાય ।
નમશ્ચર્ચિતાઙ્ગોજ્જ્વલચ્ચન્દનાય
પ્રવિચ્છેદિતપ્રાણભૃદ્બન્ધનાય ॥ ૨૨॥

નમસ્તે નમસ્તે જગત્પાવનાત્ત-
સ્વરૂપાય તસ્મૈ જગજ્જીવનાય ।
નમસ્તે નમસ્તે જગદ્વન્દિતાય
હ્યરૂપાય તસ્મૈ જગન્મોહનાય ॥ ૨૩॥

નમસ્તે નમસ્તે નમઃ ક્રૌઞ્ચભેત્રે
નમસ્તે નમસ્તે નમો વિશ્વકર્ત્રે ।
નમસ્તે નમસ્તે નમો વિશ્વગોપ્ત્રે
નમસ્તે નમસ્તે નમો વિશ્વહન્ત્રે ॥ ૨૪॥

નમસ્તે નમસ્તે નમો વિશ્વભર્ત્રે
નમસ્તે નમસ્તે નમો વિશ્વધાત્રે ।
નમસ્તે નમસ્તે નમો વિશ્વનેત્રે
નમસ્તે નમસ્તે નમો વિશ્વશાસ્ત્રે ॥ ૨૫॥

નમસ્તે નમશ્શેષરૂપાય તુભ્યં
નમસ્તે નમો દિવ્યચાપાય તુભ્યમ્ ।
નમસ્તે નમઃ સત્પ્રતાપાય તુભ્યં
નમસ્તે નમઃ સત્કલાપાય તુભ્યમ્ ॥ ૨૬॥

નમસ્તે નમઃ સત્કિરીટાય તુભ્યં
નમસ્તે નમઃ સ્વર્ણપીઠાય તુભ્યમ્ ।
નમસ્તે નમઃ સલ્લલાટાય તુભ્યં
નમસ્તે નમો દિવ્યરૂપાય તુભ્યમ્ ॥ ૨૭॥

નમસ્તે નમો લોકરક્ષાય તુભ્યં
નમસ્તે નમો દીનરક્ષાય તુભ્યમ્ ।
નમસ્તે નમો દૈત્યશિક્ષાય તુભ્યં
નમસ્તે નમો દ્વાદશાક્ષાય તુભ્યમ્ ॥ ૨૮॥

ભુજઙ્ગાકૃતે ત્વત્પ્રિયાર્થં મયેદં
    બુજઙ્ગપ્રયાતેન વૃત્તેન ક્લૃપ્તમ્ ।
તવ સ્તોત્રમેતત્પવિત્રં સુપુણ્યં
    પરાનન્દસન્દોહસંવર્ધનાય ॥ ૨૯॥

ત્વદન્યત્પરં દૈવતં નાભિજાને
    પ્રભો પાહિ (પ્રપોષ્યા હિ) સમ્પૂર્ણદૃષ્ટ્યાનુગૃહ્ય ।
યથાશક્તિ ભક્ત્યા કૃતં સ્તોત્રમેકં
    વિભો મેઽપરાધં ક્ષમસ્વાખિલેશ ॥ ૩૦॥

ઇદં તારકારેર્ગુણસ્તોત્રરાજં
    પઠન્તસ્ત્રિકાલં પ્રપન્ના જના યે ।
સુપુત્રાષ્ટભોગાનિહ ત્વેવ ભુક્ત્વા
    લભન્તે તદન્તે પરં સ્વર્ગભોગમ્ ॥ ૩૧॥

યત્પાદામ્બુજસેવયા ભુવિ નરાઃ પ્રાપ્તાઃ શ્રિયં નિશ્ચલાં
    યદ્ધ્યાનેન સમાધિયોગનિરતાઃ પ્રાપુઃ પદં શાશ્વતમ્ ।
યચ્છક્ત્યા દનુજેન્દ્રતારકભયાન્મુક્તાસ્તમિન્દ્રાદયઃ
    સુબ્રહ્મણ્યમુપાસ્મહે સુરગુરું ત્રૈલોક્યચૂડામણિમ્ ॥ ૩૩॥

ગાઙ્ગેયં વહ્નિગર્ભં શરવણજનિતં જ્ઞાનશક્તિં કુમારં
    બ્રહ્મણ્યં સ્કન્દદેવં ગુહમચલમિદં રુદ્રતેજઃ સ્વરૂપમ્ ।
સેનાન્યં તારકઘ્નં ગજમુખસહિતં કાર્તિકેયં ષડાસ્યં
    સુબ્રહ્મણ્યં મયૂરધ્વજરથસહિતં દેવદેવં નમામિ ॥ ૩૪॥

॥ ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યાભિનવનારાયણેન્દ્રસરસ્વતી-
પૂજ્યપાદશિષ્ય શ્રીમચ્છઙ્કરભગવત્પાદકૃતિષુ
શ્રીસુબ્રહ્મણ્યભુજઙ્ગપ્રયાતસ્તોત્રં સમ્પૂર્ણમ્ ॥

The aforesaid stotra ascribed to Adi Shankara, is on the deity at kukke subrahmaNya on the Western Ghats. According to its colophon, it is by shankarabhagavatpAda, pupil of abhinava nArayaNendra sarasvatI. From this it may be

surmised that the author is paramashivendra
sarasvatI, the guru of sadAshiva brahmendra.

Proofread by PSA Easwaran

---

*Shri Kukke Subrahmanya Bhujanga Stotram*
pdf was typeset on February 11, 2024

Please send corrections to *sanskrit@cheerful.com*